श्रीशारदा परमेश्वरी सुप्रभातम्

{॥ श्रीशारदा परमेश्वरी सुप्रभातम् ॥}

ॐ श्रीशारदे जगन्मातः पूर्वा संध्या प्रवर्तते ।

उत्तिष्ठ करुणापाङ्गैः कर्तव्यं विश्वमङ्गलम् ॥

श्रीशृङ्गाद्रिपुरी रत्नसिंहासननिवासिनी ।

उत्तिष्ठ शारदाम्ब श्री शङ्कराचार्य सन्नुते ॥

उत्तिष्ठोत्तिष्ठ भगवत्पादशङ्करमूर्तिभिः ।

जगद्गुरुभिराराध्ये जगज्जननि शारदे ॥

ब्रह्मर्षयोऽम्ब सनकादय एत्य भक्त्या

ब्राह्मीमनन्य मनसो हृदि ब्रह्मविद्याम् ।

त्वामामनन्त्युपनिषत्सरसीज हंसीम्

श्रीशारदाम्ब वरदे तव सुप्रभातम् ॥

फुल्लानि पङ्कजवनानि सतां मनाम्सि

धीवृत्तयश्च सरितश्च दिशः प्रसान्नाः ।

अज्ञानमाशु तिमिरं च विलीयतेऽम्ब

श्री शारदे विजयते तव सुप्रभातम् ॥

Stotram Digitalized By Sanskritdocuments.org

हंसः प्रयात्युदयमम्बुज काननेषु

हंसाः प्रसन्नमनसो मुदिता रमन्ते ।

हंसात्मना परमहंसकुलं मुदास्ते

श्री शारदे विजयते तव सुप्रभातम् ॥

श्रद्धाघनाश्शमदमादियुता विनेयाः

शुद्धाशया विदलिताखिलकर्मबन्धाः ।

आज्ञाविमुक्ति पदभाज इमे ब्रुवन्ति

श्री शारदाम्ब विमलं तव सुप्रभातम् ॥

गीर्वाणवृन्दमखिलं पुरतो विधाय

गीर्वाणवन्द्यमुपयात्युचितोपहारैः ।

शर्वादिसन्नुतपदामिह सेवितुं त्वाम्

श्री शारदाम्ब शिवदं तव सुप्रभातम् ॥

सर्वार्तिहारिणि समस्त सुखप्रदात्रि

दुर्वादिगर्वशमयित्रि जगज्जनित्रि ।

निर्वाणदात्रि निगमान्त विबोधयित्रि

श्री शारदे शिवस्वरूपिणि सुप्रभातम् ॥

सद्वेदशास्त्र निगमान्त रहस्य विज्ञाः

प्राज्ञास्त्वदङ्घ्रि सरसीज परागगन्धम् ।

आघ्राय दिव्यमभवन्निखिलाः कृतार्थाः

श्री शारदे सुमनसस्तव सुप्रभातम् ॥

मुक्तिस्थिता करतले हृदये प्रमोदः

जिह्वाग्रगाश्च सहसैव समस्तविद्याः ।

त्वद्दर्शनं भवति यस्य हि तस्य पुंसः

श्री शारदाम्ब शुभदं तव सुप्रभातम् ॥

त्वत्संस्मृतेऽरपि नरं विजहात्यलक्ष्मीः

लक्ष्मीः समाश्रयति नूनमचञ्चलाम्ब ।

श्रद्धावतां त्वयि विमुक्तिरयत्नसिद्धा

श्री शारदे जगदधीश्वरि सुप्रभातम् ॥

ब्रह्मात्मभावमधिगम्य हृदा सदात्मा

रामा अपि त्वदमलाङ्घ्रि सरोजरेणून् ।

वाञ्छत्यमी परमहंसकुलावतंसाः

शी शारदाम्ब हृदये तव सुप्रभातम् ॥

तुङ्गासरिद्विमलवारि तरङ्गरङ्ग

रिङ्गत्सरोजवनदिव्य सुगन्धवाहः ।

अङ्गीकुरुष्व पवनः प्रकरोति सेवाम्

श्री शारदाम्ब कृपया तव सुप्रभातम् ॥

प्राक् सिन्धु पाथसि त्रयीतनुरेषभक्त्या
स्नातस्तथोदय गिरावुदितस्तपस्वी ।
त्वत्पादपद्मभजनाय सहस्रभानुः
श्री शारदाम्ब समुदेति च सुप्रभातम् ॥

ब्रह्माच्युतत्रिनयना विनयेन भक्त्या
सिंहासने स्थितवतीं प्रणवस्वरूपाम् ।
वाचा हृदा च वपुषा च समाश्रयन्ति
श्री शारदाम्ब परमेश्वरि सुप्रभातम् ॥

इन्द्रानलादय इमे दिगधीश्वराश्च
सूर्येन्दुभौमबुधगीष्पति शुक्रमुख्याः ।
सर्वे ग्रहाश्च भयभक्तियुता नमन्ति
श्री शारदे तव महेश्वरि सुप्रभातम् ॥

देवाङ्गनामणिगणश्च शचीमुखोऽयम्
त्वामीश्वरीं त्रिजगदेक समर्चनीयाम् ।
संसेवितुं सुसमये समुपागतेऽस्मिन्
श्री शारदाम्ब विहिते तव सुप्रभातम् ॥

वाचा सुधा मधुरया रमणीय सप्त
तन्त्रीप्रकर्श मधुरस्वनया महत्या ।

देवर्षिवर्य इह गायति भक्तिनम्रः

श्री शारदाम्ब मधुरं तव सुप्रभातम् ॥

त्वत्पादपङ्कज पराग सुगन्धलेशम्

आघ्राय सत्कविमदभ्रमरा प्रहृष्टाः ।

गायन्ति कोमलमनोहरवृत्तपद्यैः

श्री शारदाम्ब ललितैस्तव सुप्रभातम् ॥

श्री व्यासशङ्करसुरेश्वरपद्मपादा

द्याचार्यवर्यपरिपूजित पादपद्मे ।

लीलाशुकाक्षवलयोज्वल पाणिपद्मे

श्री शारदाम्ब परमे तव सुप्रभातम् ॥

पद्माक्षि पद्ममुखि पद्मभवादिवन्द्ये

पद्मालयेऽखिलवराभय पाणिपद्मे ।

हृत्पद्मपीठमधितिष्ठ ममापि मातः

श्री शारदे करुणया तव सुप्रभातम् ॥

यः पुस्तकाक्षवलयाञ्चित पाणिपद्माम्

वागीश्वरीं हृदयपद्मगतां स्मरेत्वाम् ।

वागीशतां समुपयाति स सद्य एव

श्री शारदाम्ब भुवने तव सुप्रभातम् ॥

संसारसागरमपारमनन्तलोल
कल्लोल दुर्ललितमेतमतीत्यतूर्णम् ।
तीर्णः स्वयं स खलु तारयति श्रितांश्च
श्री शारदे स्मरति यस्तव सुप्रभातम् ॥

राकाशशाङ्करमणीय मनोज्ञकान्तिम्
सोमावतम्समकुटां सुमकोमलाङ्गीम् ।
त्वां संस्मरामि कृपयैव विलोकयन्तीम्
श्री शारदाम्ब हृदि मां तव सुप्रभातम् ॥

दातुं त्रिवर्गमपवर्गमपि त्रिलोक्याः
नूनं निजस्मरणतोऽपि समेधमाने ।
त्वद्वक्त्र चन्द्रमसि चन्द्रमसापयातम्
श्री शारदाम्ब शशिना तव सुप्रभातम् ॥

पूर्णे कलङ्करहिते भुवनार्तिहारि-
ण्यज्ञानसन्तमसभेदिनि त्वन्मुखेन्दौ ।
नित्योदिते जगति भक्तचकोरलोकः
श्री शारदाम्ब मुदितस्तव सुप्रभातम् ॥

पुण्याः स्त्रियाश्च पुरुषाश्च कलावपि त्वाम्
मातर्यदा कृतयुगे परयाम्ब भक्त्या ।

संसेव्य श‍ृङ्गगिरिपीठगतां कृतार्थाः

श्री शारदे कृतधियस्तव सुप्रभातम् ॥

त्वत्सेवनाय भवबन्धविमुक्तिकामाः

कारुण्यकल्पलतिके कतिचिन्महान्तः ।

आयान्ति शुद्धचरितास्सुधियश्च भक्ताः

श्री शारदे प्रमुदितास्तव सुप्रभातम् ॥

श्री चन्द्रशेखर जगद्गुरु सार्वभौम

श्री पाणि पद्मज जगद्गुरुसार्वभौमैः ।

तत्पाणिपङ्कज समुत्थ गुरूत्तमैश्च

श्री शारदाम्ब विनुते तव सुप्रभातम् ॥

ये सज्जना अनुदिनं मुदिताः प्रभाते

भक्त्या पठन्ति परया भुवि शारदायाः ।

श्रीसुप्रभात विनुतिं सकलैर्विमुक्ताः

क्लेशैः प्रयान्ति पुरुषार्थ चतुष्टयं द्राक् ॥

ये सुप्रभातमिदमाश्रितवत्सलायाः

श्रद्धायुता अनुदिनं हृदि शारदायाः ।

प्रातः पठन्ति मनुजा जगदम्बिकायाः

ते प्राप्नुवन्ति सुजनास्सकालानभीष्टान् ॥

श्री शारदा सुप्रभात स्मरणात्करुणानिधिः ।

पारदा स्यात् क्षणेनैवापारसंसार वारिधेः ॥

Encoded by R. Harshananda harshanand\—16@rediffmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Sharada Parameshwari Suprabhatam Lyrics in Devanagari PDF
% File name : shAradAparameshvarisupr.itx
% Category : suprabhAta
% Location : doc_devii
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : R. Harshananda harshanand_16 at rediffmail.com
% Latest update : April 17, 2002
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website